श्रीमहागणपत्यथर्वशीर्षम्
श्रीमहागणपतिसहस्रनामस्तोत्रम्
श्रीमहागणपतिसहस्रनामावलिः ॥



केशव भिकाजी ढवळे
श्रीसमर्थ-सदन
गिरगाव, मुंबई.

श्रीगणपति अथर्वशीर्षांतील पाठभेद

संकलक : प्रा. डॉ. सी. ग. देसाई, एम्. ए., पीएच्. डी.

पंचायतनांतील पांचही देवतांचीं अथर्वशीर्षें आहेत; परंतु अथर्वशीर्ष म्हटल्यावर प्रामुख्यानें आठवण होते ती गणपति अथर्वशीर्षाचीच. ह्या अथर्वशीर्षात कांहीं पाठभेद आहेत. आपापल्या रूढीप्रमाणें भक्तिभावपूर्वक कोणत्याही पाठानुसार पठण केलें तरी श्रीगणेशाची कृपा प्राप्त व्हावी; परंतु दुसरे पाठभेदही गणेशभक्तांना परिचित व्हावेत म्हणून हें संकलन.

अथर्वशीर्षाच्या नांवांचेंच उदाहरण घेऊं या. गणपत्युपनिषत्, गणपत्यथर्वशीर्षम् व श्रीमहागणपत्यथर्वशीर्षम् अशीं तीन नांवें उपलब्ध आहेत. शक्तिसहित गणपतीला महागणपति असें म्हणतात.

१. 'गणपत्युपनिषत्' ह्या उपनिषदाच्या प्रारंभीं पुढील श्लोक आहे.

यं नत्वा मुनयः सर्वे निर्विघ्नं यान्ति तत्पदम्।
गणेशोपनिषद्वेद्यं तद्ब्रह्मैवास्मि सर्वगम्॥ हरिः ॐ॥

२. अथर्वशीर्षाच्या प्रारंभीं ॐ भद्रं कर्णेभिः वगैरे शान्तिपाठ म्हणतात. त्यांत 'ॐ तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारमवतु वक्तारम्।' हा शेवटचा भाग कांहीं गणेशभक्त म्हणत नाहींत.

३. त्वमेव केवलं धर्तासि। यानंतर अव त्वं माम्। हें वाक्य बऱ्याच पाठांत नाहीं.

४. अव वक्तारम्। किंवा अवतु वक्तारम्। कांहीं पाठांत प्रथम अव श्रोतारम्। आणि नंतर अव वक्तारम् असा क्रम आढळतो.

५. अव पश्चात्तात्। हा क्रम अव पुरस्तात्। अव दक्षिणात्तात्। अव पश्चात्तात्। अवोत्तरात्तात्। असाही आहे.

६. त्वं चत्वारि वाक्पदानि। ऐवजीं त्वं चत्वारि वाक्परिमितानि पदानि।

७. त्वं कालत्रयातीतः। नंतर त्वं अवस्थात्रयातीतः। हें वाक्य अधिक आहे.

८. तारेण रुद्धम्। ऐवजीं तारेण युक्तम्।

९. एतत्तव मनुस्वरूपम्। ऐवजीं एतदैव तव मनुस्वरूपम्।

श्रीमहागणपत्यथर्वशीर्षम्

श्रीगणेशपुराणान्तर्गत–

श्रीमहागणपतिसहस्रनामस्तोत्रम्

तथा च

श्रीमहागणपतिसहस्रनामावलिः ॥

संग्राहक

वे. शा. सं. चिंतामण गणेश प्रथम, चौल

प्रस्तावनालेखक

न्यायरत्न धुंडिराजशास्त्री विनोद, एम्. ए.

आठवे पुनर्मुद्रण : १९९८

किंमत ६ रुपये

कजाप भिकाजी ढवळे
श्रीसमर्थ-सदन
मिरज, पुणे

G... DING AGENCY
Opp. P.O. ... B, Mumbai-400 0...
Phone : 4141344/4143140

©केशव भिकाजी ढवळे
पहिली आवृत्ती : १९३६
पुनर्मुद्रण १९४९, १९५८, १९७५, १९८५, १९९०, १९९५
आठवी आवृत्ती :१९९८

कर्नाटक मुद्रणालय, मुंबई २
यांनी छापलेल्या मूळ प्रतीवरून
हे प्रतिरूप मुद्रण केलेले आहे.

मुद्रक
प्रदीश मुद्रण
गायवाडी गिरगाव,
मुंबई ४०० ००४.

प्रकाशक
ज्योती धनंजय ढवळे
केशव भिकाजी ढवळे
श्रीसमर्थ सदन, पहिली भटवाडी,
गिरगाव, मुंबई ४०० ००४

प्रस्तावना

भविष्यत्कालच्या भाग्यारूढ भारताला व आजच्या किंकर्तव्यमूढ हिंदु जनतेला, स्वतःच्या अंतःसामर्थ्याची स्फूर्ति देणारें आर्यसंस्कृतीचें एक अत्यंत तेजःपुंज प्रतीक म्हणजेच श्रीमन्महागणपति होय. गणांचा, युद्धप्रवण रणधीरांचा जो अधिपति तो गणपति. मानवसमाजाच्या आद्य कविद्रष्टारांनीं आपल्या ऋग्वेदीय ब्रह्मणस्पतिसूक्तांत, महायुद्धाची अधिष्ठात्री देवता म्हणून श्रीगणपतीच्या कल्पमूर्तीचा उल्लेख केला आहे. सार्वजनिक स्वातंत्र्याच्या महन्मंगलाची संप्राप्ति करविण्याचें दैवी सामर्थ्य श्रीमन्महागणपतीमध्यें स्वतःसंसिद्ध असल्यामुळें हें उपास्य दैवत सर्व मंगलावाप्तीचें महाकारण म्हणून आर्यांच्या यज्ञसंस्थेमध्यें पुण्याहवाचकत्वानें समाविष्ट झालें आहे. भगवान् पतंजलींनीं, क्लेशकर्मविपाकाशयानें अपरामृष्ट, अकलंकित असलेल्या पुरुषविशेषाला "ईश्वर" अशी संज्ञा देऊन त्याच्या ठिकाणीं सर्वज्ञबीजाची कल्पना केली आहे आणि त्या परम ईश्वराचें वाचक ॐकार स्वरूप किंवा प्रणवमंत्राची शब्दमूर्ति असल्याचा निर्णय दिला आहे. क्षात्रतेज व ब्राह्मबीज, सार्वजनिक स्वातंत्र्य व वैयक्तिक मोक्ष ह्या दोन्ही ध्येयांचा समन्वय श्रीमन्महागणपतीमध्यें झाला आहे.

शुंडाविशिष्ट गजानन ही ॐकाराची, प्रणवाची, स्थूल–विकृत नव्हे–आविष्कृति आहे. प्रतिनिधित्वानें ही स्थूलमूर्ति, "अपूर्वम्, अनपरम्, अनंतरम्, अबाह्यम्, अस्थूलम्, अनणु, अदीर्घम्, अह्रस्वम्" अशा वेदोपदिष्ट परात्पर परब्रह्माच्या साक्षात्कारचें सहजसुलभ उपकरण आहे. श्रीगणेशसंप्रदायाचें वाङ्मय हा एक अथांग महोदधि आहे; आधुनिक संशोधकांना त्याच्या किनाऱ्यावरील एखाददुसरा वालुकाकणच उपलब्ध झाला आहे. गाणपत्यांचें उपासनाशास्त्र ही गुह्याद्गुह्यतम अशी प्रतीकविद्या आहे. बहुजनसमाजांत ह्या राजविद्येचा आज लोप झाला असला तरी तिचे एकाकी प्रतिनिधि कोठें कोठें आढळतात. मला स्वतःला हरिद्वार येथें व कुंभकोणम् येथें महान् अधिकारी गाणपत्यांच्या दर्शनश्रवणाचा लाभ झाला होता. पाश्चात्य संस्कृतीच्या संसर्गानें, किंवा उपसर्गानें, भारतीयांची अध्यात्मविद्या लुप्तप्राय होऊं लागली आहे. गणेशाथर्वशीर्षांतील रक्षामंत्रांत, सर्व बाजूंनीं,–वरून, खालून, दक्षिणेकडून, उत्तरेकडून, पुढून म्हणजे पूर्वेकडून व पाठीमागून म्हणजे पश्चिमेकडून–माझें रक्षण कर—"अव पश्चात्तात्" अशी प्रार्थना उपासक करीत असतो. मला नेहमीं

वाटतें कीं, हिंदुमात्रानें "अव पश्चात्तात्"—पश्चिमेकडून, पाश्चात्यांच्या निरधिष्ठान जडवादापासून, हे मंगलमूर्ते, आमचें रक्षण कर अशी प्रार्थना विशेष उत्कटतेनें केली पाहिजे !

श्रीगणेशविद्येविषयींचा हा अल्प प्रस्ताव, ज्या पुस्तिकेच्या प्रकाशनामुळें प्रासंगिक झाला आहे त्या पुस्तिकेंत, श्रीमहागणपत्यथर्वशीर्ष, श्रीगणेशपुराणांतर्गत श्रीमहागणपतिसहस्रनाम आणि श्रीमहागणपतिसहस्रनामावलि ह्या त्रिदलाचा समावेश झाला आहे. गणेशपुराणांतर्गत म्हणून ज्या गणपतिसहस्रनामाच्या छापील प्रति उपलब्ध आहेत त्या, नामसंख्येच्या दृष्टीनें व सांप्रदायिक पीठिकेच्या दृष्टीनें, सप्रमाद आहेत. ह्या पुस्तकेचें वैशिष्ट्य हें आहे कीं, आद्य जगद्गुरु श्रीशंकराचार्य ह्यांच्या अविच्छिन्न परंपरेंतील सुश्रेष्ठ परमाचार्य भास्करराय भारती ह्यांनीं केलेल्या गणेशसहस्रनामावरील 'खद्योत' नांवाच्या संस्कृत श्लोकबद्ध वृत्तीला मूलाधिष्ठान कल्पून व त्याचप्रमाणें सांप्रदायिक प्ररूढ पाठांना अनुसरून हें सहस्रनाम व नामावलि शोधित व संसिद्ध केली आहे. 'खद्योत' हें अभिधान भास्कराचार्यानीं साभिप्राय दिलें असून त्यांच्या खालील श्लोकांनीं ह्या अभिप्रायावर चांगलाच प्रकाश पडेल.

नाम्नामथश्चिदाकाशस्तमुद्योतयितुमुद्यतः ।
ग्रन्थः खद्योत नामाऽस्तु ब्रह्म खं गगनं च खं ॥
सम्प्रदायजुषामेष खद्योतो लोकबान्धवः ।
ग्रन्थविस्तरलुब्धानां खद्योतो ज्योतिरिङ्गणः ॥

खद्योतवृत्तौ शतकारम्भकनामानि

आदौ गणेश्वरः पश्चात् सवनेत्राधिवासकः
तेजोवतीशिरोरत्नं भोगदाकान्तिमण्डितः
उडुभृन्मौलिरथ च प्रोक्तो दुण्ढिविनायकः ।
रसप्रियोऽहर्निशं च मोक्षोष्टैश्वर्यदायकः ॥
इमानि शतकादीनि नामानि क्रमतो दश ।

महागणपतीच्या उपासकांना अत्यंत उपयुक्त अशा ह्या पुस्तिकेचें कर्तृत्व प्रामुख्यानें वे. शा. सं. चिंतामणि गणेश प्रथम, चौल (जि. कुलाबा)

व रा. म. ज. पेंडसे, अलिबाग, ह्यांजकडे आहे. ह्या दोघांनीं, प्रथमभट्टजींच्या संग्रहीं असलेल्या खद्योतवृत्तीवरून सहस्रनाम व नामावलि ह्यांचें प्रकटीकरण, परीक्षण व निर्णयन करून शुद्ध प्रत तयार केली; पण ह्या दोन्ही उपासकांच्या सश्रद्ध आकांक्षेला सूर्यप्रकाशांत आणण्याचें श्रेय मुंबईचे केशव भिकाजी ढवळे, प्रकाशक, ह्यांजकडे आहे. शिवाय, मुंबई येथील प्रथितयश मंत्रशास्त्रज्ञ श्रीमान् गोडबोलेमहाराज ह्यांनींही आपल्या नजरेखालून पुस्तिकेचीं स्थूल मुद्रितें घातल्यामुळें हें प्रकाशन विशेष प्रमाणशुद्ध झालें आहे. उपासनेवीण दुराश्रित झालेल्या महाराष्ट्रीय जनतेला ही पुस्तिका श्रीमंगलमूर्तींचा शुभाशीर्वादच वाटेल. अस्तु. खालील स्वस्तिवाचनानें हा प्रस्ताव संपूर्ण करितों.

ॐ भद्रं कर्णेभिः श्रुणुयाम देवा भद्रं पश्येम अक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्तिः न पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ।

जपयज्ञभुवन, श्रीगोवर्धन संस्था,
खेतवाडी, मेनरोड, मुंबई नं. ४
अ. भाद्रपद शु. १, शक १८५१

धुं. गो. विनोद

तिसरी आवृत्ति

श्रीमहागणपत्यथर्वशीर्ष, श्रीमहागणपतिसहस्रनाम स्तोत्र व श्रीमहागणपतिसहस्रनामावलि ह्या त्रिदलाची ही तिसरी आवृत्ति प्रसिद्ध करण्याचा मंगल योग आज येत आहे. खद्योतिनी टीकेला अनुसरून व सांप्रदायिक रूढ पाठांप्रमाणें सहस्रनाम व नामावलि संसिद्ध व संशोधित केली आहे आणि मागील आवृत्तींतील सर्व मुद्रणप्रमाद शक्य तों सुधारले आहेत. ह्या कामीं वे. रा. रा. दत्तात्रेय चिंतामणशास्त्री प्रथम, रा. रा. म. ज. पेंडसे, तसेंच प्रा. डॉ. सी. ग. देसाई ह्यांनीं परिश्रम घेतले आहेत. ह्याबद्दल त्यांचे आम्ही फार आभारी आहोंत. सध्याच्या महर्घतेच्या काळांत मूल्य फार वाढवावें लागूं नये म्हणून टंक कांहींसा लहान वापरून पृष्ठसंख्या कमी केली आहे. तरीही किंमत थोडीशी वाढवावी लागलीच आहे.

ह्या आवृत्तीचें आणखी एक वैशिष्ट्य म्हणजे प्रा. डॉ. सी. ग. देसाई ह्यांनीं संकलन केलेलें श्रीगणपत्यथर्वशीर्षाचे बहुविध पाठभेद एकत्र दिले आहेत. अर्थात् पुस्तकांतील पाठ खद्योतिनी टीकेला अनुसरून दिला आहे. दुसरे जे अनेक पाठभेद आहेत, तेही गणेशभक्तांना परिचित व्हावेत, ह्या हेतूनें हा भाग अधिक जोडला आहे.

प्रकाशक

श्रीमहागणपत्यथर्वशीर्षम् ।

॥ श्रीगणेशाय नमः ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः ।
भद्रं पश्येमाक्षभिर्यजत्राः ॥
स्थिरैरंगैस्तुष्टुवांसस्तनूभिः ।
व्यशेम देवहितं यदायुः ॥ १ ॥
ॐ स्वस्ति न इंद्रो वृद्धश्रवाः ।
स्वति नः पूषा विश्ववेदाः ॥
स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः ।
स्वस्ति नो बृहस्पतिर्दधातु ॥ २ ॥
ॐ तन्मामवतु । तद्वक्तारमवतु । अवतुमाम् ।
अवतुवक्तारमवतुवक्तारम् ।
ॐ शान्तिः शान्तिः शान्तिः ।

अथ गणेशअथर्वशीर्षं व्याख्यास्यामः ॥ ॐ नमस्ते गणपतये ॥ त्वमेव प्रत्यक्षं तत्त्वमसि ॥ त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि ॥ अव त्वं माम् ॥ त्वमेव केवलं हर्तासि ॥ त्वमेव सर्वं खल्विदं ब्रह्मासि ॥ त्वं साक्षादात्मासि नित्यम् ॥ १ ॥ ऋतं वच्मि ॥ सत्यं वच्मि ॥ २ ॥ अव त्वं माम् ॥ अवतुवक्तारम् ॥ अव श्रोतारम् ॥ अव दातारम् ॥ अव धातारम् ॥ अवानूचानमव शिष्यम् ॥ अव पश्चात्तात् ॥ अव पुरस्तात् ॥ अवोत्तरात्तात् ॥ अव दक्षिणात्तात् ॥ अव चोर्ध्वात्तात् ॥ अवाधरात्तात् ॥ सर्वतो मां पाहि पाहि

समन्तात् ॥ ३ ॥ त्वं वाङ्मयस्त्वं चिन्मयः ॥ त्वमानन्दमयस्त्वं ब्रह्ममयः ॥ त्वं सच्चिदानन्दाद्वितीयोऽसि ॥ त्वं प्रत्यक्षं ब्रह्मासि ॥ त्वं ज्ञानमयो विज्ञानमयोऽसि ॥ ४ ॥ सर्वं जगदिदं त्वत्तो जायते ॥ सर्वं जगदिदं त्वत्तस्तिष्ठति ॥ सर्वं जगदिदं त्वयि लयमेष्यति ॥ सर्वं जगदिदं त्वयि प्रत्येति ॥ त्वं भूमिरापोऽनलोऽनिलो नभः ॥ त्वं चत्वारि वाक्पदानि ॥५॥ त्वं गुणत्रयातीतः ॥ त्वं देहत्रयातीतः ॥ त्वं कालत्रयातीतः ॥ त्वं मूलाधारस्थितोऽसि नित्यम् ॥ त्वं शक्तित्रयात्मकः ॥ त्वां योगिनो ध्यायन्ति नित्यम् ॥ त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवःस्वरोम् ॥ ६ ॥ गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम् ॥ अनुस्वारः परतरः ॥ अर्धेन्दुलसितम् ॥ तारेण रुद्धम् ॥ एतत्तव मनुस्वरूपम् ॥ गकारः पूर्वरूपम् ॥ अकारो मध्यमरूपम् ॥ अनुस्वारश्चान्त्यरूपम् ॥ बिन्दुरुत्तररूपम् ॥ नादःसन्धानम् ॥ सँहिता सन्धिः ॥ सैषा गणेशविद्या गणक ऋषिः ॥ निचृद्गायत्री छन्दः ॥ गणपतिर्देवता ॥ ॐ गं गणपतये नमः ॥ ७ ॥ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ॥ तन्नो दन्ती प्रचोदयात् ॥ ८ ॥ एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ॥ रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥ रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ॥ रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥ भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् ॥ आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥ एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९ ॥ नमो व्रातपतये नमो गणपतये नमः प्रमथपतयेनमः नमस्ते अस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवपुत्राय वरदमूर्तये नमः ॥ १० ॥ एतदथर्वशीर्षं योऽधीते ॥ स ब्रह्मभूयाय कल्पते ॥ स सर्वतः सुखमेधते ॥ स सर्वविघ्नैर्न बाध्यते ॥ स पञ्चमहापापात्प्रमुच्यते ॥ सायमधीयानो दिवसकृतं पापं नाशयति ॥ प्रातरधीयानो रात्रिकृतं पापं नाशयति ॥ सायम्प्रातः प्रयुञ्जानो अपापो भवति ॥ सर्वत्राधीयानोऽपविघ्नो भवति ॥ धर्मार्थकाममोक्षं च विन्दति ॥ इदमथर्वशीर्षम-

शिष्याय न देयम् ॥ यो यदि मोहाद्दास्यति ॥ स पापीयान् भवति ॥ सहस्रावर्तनात् ॥ यं यं काममधीते ॥ तं तमनेन साधयेत् ॥ ॥ ११ ॥ अनेन गणपतिमभिषिञ्चति ॥ स वाग्मी भवति ॥ चतुर्थ्यामनश्नञ्जपति ॥ स विद्यावान्भवति ॥ इत्यथर्वणवाक्यम् ॥ ब्रह्माद्यावरणं विद्यात् ॥ न बिभेति कदाचनेति ॥ १२ ॥ यो दूर्वाङ्कुरैर्यजति ॥ स वैश्रवणोपमो भवति ॥ यो लाजैर्यजति ॥ स यशस्वीभवति ॥ स मेधावान्भवति ॥ यो मोदकसहस्रेण यजति ॥ स वाञ्छितफलमवाप्नोति ॥ यः साज्यसमिद्भिर्यजति ॥ स सर्वं लभते स सर्वं लभते ॥ अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति ॥ सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा ॥ सिद्धमन्त्रो भवति ॥ महाविघ्नात्प्रमुच्यते ॥ महादोषात्प्रमुच्यते ॥ महापापात्प्रमुच्यते ॥ स सर्वविद्भवति स सर्वविद्भवति ॥ य एवं वेद ॥ इत्युपनिषत् ॥ १३ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः ।
भद्रं पश्येमाक्षभिर्यजत्राः ॥
स्थिरैरंगैस्तुष्टुवांसस्तनूभिः ।
व्यशेम देवहितं यदायुः ॥ १ ॥

ॐ स्वस्ति न इंद्रो वृद्धश्रवाः ।
स्वस्ति नः पूषा विश्ववेदाः ॥
स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः ।
स्वस्ति नो बृहस्पतिर्दधातु ॥ २ ॥

ॐ तन्मामवतु । तद्वक्तारमवतु । अवतुमाम् ।
अवतुवक्तारमवतुवक्तारम् ।

ॐ शान्तिः शान्तिः शान्तिः ।

श्रीमहागणपतिसहस्रनामस्तोत्रम् ।

॥ श्रीगणेशाय नमः ॥

व्यास उवाच—

कथं नाम्नां सहस्रं स्वं गणेश उपदिष्टवान् ॥
शिवायै तन्ममाचक्ष्व लोकानुग्रहतत्पर ॥ १ ॥

ब्रह्मोवाच—

देव एवं पुरारातिः पुरत्रयजयोद्यमे ॥
अनर्चनाद्गणेशस्य जातो विघ्नाकुलः किल ॥ २ ॥
मनसा स विनिर्धार्य ततस्तद्विघ्नकारणम् ॥
महागणपतिं भक्त्या समभ्यर्च्य यथाविधि ॥ ३ ॥
विघ्नप्रशमनोपायमपृच्छदपराजितः ॥
संतुष्टः पूजया शम्भोर्महागणपतिः स्वयम् ॥ ४ ॥
सर्वविघ्नैकहरणं सर्व कामफलप्रदम् ॥
ततस्तस्मै स्वकं नाम्नां सहस्रमिदमब्रवीत् ॥ ५ ॥
अस्य श्रीमहागणपतिसहस्रनामस्तोत्रमन्त्रस्य ॥
महागणपतिर्ऋषिः । अनुष्टुप्छन्दः । महागणपतिर्देवता ॥
गं बीजम् । हुं शक्तिः । स्वाहा कीलकम् ॥
चतुर्विध पुरुषार्थसिद्ध्यर्थे जपादौ विनियोगः ॥

॥ अथ ध्यानम् ॥

हस्तीन्द्राननमिन्द्रचूडमरुणच्छायं त्रिनेत्रं रसात्
आश्लिष्टं प्रियया सपद्मकरया स्वांकस्थया संततं ।
बीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पल-
त्रीह्यग्रस्वविषाणरत्नकलशान्हस्तैर्वहन्तं भजे ॥ १ ॥
गंडपालीगलद्दानपूरलालसमानसान् ॥

द्विरेफान्कर्णतालाभ्यां वारयन्तं मुहुर्मुहुः ॥
कराग्रधृतमाणिक्यकुंभवक्त्रविनिर्गतैः ॥
रत्नवर्षैः प्रीणयन्तं साधकान्मदविव्हलम् ॥
माणिक्यमुकुटोपेतं सर्वाभरणभूषितम् ॥

॥ इति ध्यानम् ॥

ॐ गणेश्वरो[१] गणक्रीडो[२] गणनाथो[३] गणाधिपः[४] ॥
एकदंष्ट्रो[५] वक्रतुण्डो[६] गजवक्त्रो[७] महोदरः[८] ॥ १ ॥
लम्बोदरो[९] धूम्रवर्णो[१०] विकटो[११] विघ्ननायकः[१२] ॥
सुमुखो[१३] दुर्मुखो[१४] बुद्धो[१५] विघ्नराजो[१६] गजाननः[१७] ॥ २ ॥
भीमः[१८] प्रमोदः[१९] आमोदः[२०] सुरानन्दो[२१] मदोत्कटः[२२] ॥
हेरम्बः[२३] शम्बरः[२४] शम्भुलम्बकर्णो[२५] महाबलः[२६] ॥ ३ ॥
नन्दनोऽलम्पटोऽभीरुर्मेघनादो[३०] गणञ्जयः[३१] ॥
विनायको[३२] विरूपाक्षो[३३] धीरशूरो[३४] वरप्रदः[३५] ॥ ४ ॥
महागणपतिर्बुद्धिप्रियः[३६] क्षिप्रप्रसादनः[३७] ॥
रुद्रप्रियो[३८] गणाध्यक्ष[३९] उमापुत्रोऽघनाशनः[४०] ॥ ५ ॥
कुमारगुरुरीशानपुत्रो[४१] मूषकवाहनः[४२] ॥
सिद्धिप्रियः[४३] सिद्धिपतिः[४४] सिद्धः[४५] सिद्धिविनायकः[४६] ॥ ६ ॥
अविघ्नस्तुम्बरुः[४७] सिंहवाहनो[४८] मोहिनीप्रियः[४९] ॥
कटङ्कटो[५०] राजपुत्रः[५१] शालकः[५२] सम्मितोऽमितः[५३] ॥ ७ ॥
कूष्माण्डसामसम्भूतिर्दुर्जयो[५४] धूर्जयो[५५] जयः[५६] ॥
भूपतिर्भुवनपतिर्भूतानांपतिरव्ययः[५७] ॥ ८ ॥
विश्वकर्ता[५८] विश्वमुखो[५९] विश्वरूपो[६०] निधिर्घृणिः[६१] ॥
कविः[६२] कवीनामृषभो[६३] ब्रह्मण्यो[६४] ब्रह्मणस्पतिः[६५] ॥ ९ ॥
ज्येष्ठराजो[६६] निधिपतिर्निधिप्रियपतिप्रियः[६७] ॥
हिरण्मयपुरान्तस्थः[६८] सूर्यमण्डलमध्यगः[६९] ॥ १० ॥

कराहतिध्वस्तसिन्धुसलिलः पूषदन्तभित् ॥
उमाङ्ककेलिकुतुकी मुक्तिदः कुलपालनः ॥ ११ ॥
किरीटी कुण्डली हारी वनमाली मनोमयः ॥
वैमुख्यहेतुदैत्यश्रीः पादाहतिजितक्षितिः ॥ १२ ॥
सद्योजातस्वर्णमुञ्जमेखली दुर्निमित्तहृत् ॥
दुःस्वप्नहृत्प्रसहनो गुणी नादप्रतिष्ठितः ॥ १३ ॥
सुरूपः सर्वनेत्राधिवासो वीरासनाश्रयः ॥
पीताम्बरः खण्डरदः खण्डेन्दुकृतशेखरः ॥ १४ ॥
चित्राङ्गश्यामदशनो भालचन्द्रश्चतुर्भुजः ॥
योगाधिपस्तारकस्थः पुरुषो गजकर्णकः ॥ १५ ॥
गणाधिराजो विजयस्थिरो गजपतिध्वजी ॥
देवदेवः स्मरप्राणदीपको वायुकीलकः ॥ १६ ॥
विपश्चिद्वरदो नादोन्नादभिन्नबलाहकः ॥
वराहरदनो मृत्युञ्जयो व्याघ्राजिनाम्बरः ॥ १७ ॥
इच्छाशक्तिधरो देवत्राता दैत्यविमर्दनः ॥
शम्भुवक्त्रोद्भवः शम्भुकोपहा शम्भुहास्यभूः ॥ १८ ॥
शम्भूतेजाः शिवाशोकहारी गौरीसुखावहः ॥
उमाङ्गमलजो गौरीतेजोभूः स्वर्धुनीभवः ॥ १९ ॥
यज्ञकायो महानादो गिरिवर्ष्मा शुभाननः ॥
सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्धा ककुप्श्रुतिः ॥ २० ॥
ब्रह्माण्डकुम्भश्चिद्व्योमभालः सत्यशिरोरुहः ॥
जगज्जन्मलयोन्मेषनिमेषोऽन्यर्कसोमदृक् ॥ २१ ॥
गिरीन्द्रैकरदो धर्माधर्मोष्ठः सामबृंहितः ॥
ग्रहर्क्षदशनो वाणीजिह्वो वासवनासिकः ॥ २२ ॥
कुलाचलांसः सोमार्कघण्टो रुद्रशिरोधरः ॥
नदीनदभुजः सप्ताङ्गुलीकस्तारकानखः ॥ २३ ॥

भ्रूमध्यसंस्थितकरो[161] ब्रह्मविद्यामदोत्कटः[162] ॥
व्योमनाभिः[163] श्रीहृदयो[164] मेरुपृष्ठोऽर्णवोदरः[165] ॥ २४ ॥
कुक्षिस्थयक्षगन्धर्वरक्षःकिन्नरमानुषः[166] ॥
पृथ्वीकटिः[167] सृष्टिलिङ्गः[168] शैलोरुर्दस्रजानुकः[169] ॥ २५ ॥
पातालजङ्घो[170] मुनिपात्कालाङ्गुष्ठस्त्रयीतनुः[171] ॥
ज्योतिर्मण्डलाङ्गूलो[172] हृदयालानिश्चलः[173] ॥ २६ ॥
हृत्पद्मकर्णिकाशालिवियत्केलिसरोवरः[174] ॥
सद्भक्तध्याननिर्गडः[175] पूजावारीनिवारितः[176] ॥ २७ ॥
प्रतापी[177] कश्यपसुतोगणपो[178] विष्टपी[179] बली[180] ॥
यशस्वी[181] धार्मिकः[182] स्वोजाः[183] प्रथमः[184] प्रथमेश्वरः[185] ॥ २८ ॥
चिन्तामणिद्वीपपतिः[186] कल्पद्रुमवनालयः[187] ॥
रत्नमण्डपमध्यस्थो[188] रत्नसिंहासनाश्रयः[189] ॥ २९ ॥
तीव्राशिरोद्धृतपदो[190] ज्वालिनीमौलिलालितः[191] ॥
नन्दानन्दितपीठश्रीभोगदाभूषितासनः[192] ॥ ३० ॥
सकामदायिनीपीठः[193] स्फुरदुग्रासनाश्रयः[194] ॥
तेजोवतीशिरोरत्नं[195] सत्यानित्यावतंसितः[196] ॥ ३१ ॥
सविघ्ननाशिनीपीठः[197] सर्वकृत्यम्बुजाश्रयः[198] ॥
लिपिपद्मासनाधारो[199] वह्निधामत्रयाश्रयः[200] ॥ ३२ ॥
उन्नतप्रपदो[201] गूढगुल्फः[202] संवृतपार्ष्णिकः[203] ॥
पीनजङ्घः[204] श्लिष्टजानुः[205] स्थूलोरुः[206] प्रोन्नमत्कटिः[207] ॥ ३३ ॥
निम्ननाभिः[208] स्थूलकुक्षिः[209] पीनवक्षा[210] बृहद्भुजः[211] ॥
पीनस्कन्धः[212] कम्बुकण्ठो[213] लम्बोष्ठो[214] लम्बनासिकः[215] ॥ ३४ ॥
भग्नवामरदस्तुङ्गसव्यदन्तो[216] महाहनुः[217] ॥
ह्रस्वनेत्रत्रयः[218] शूर्पकर्णो[219] निबिडमस्तकः[220] ॥ ३५ ॥
स्तबकाकारकुम्भाग्रो[221] रत्नमौलिर्निरंकुशः[222] ॥
सर्पहारकटीसूत्रः[223] सर्पयज्ञोपवीतवान्[224] ॥ ३६ ॥

सर्पकोटीरकटकः[२३३] सर्पग्रैवेयकाङ्गदः[२३४] ॥
सर्पकक्ष्योदरोबन्धः[२३५] सर्पराजोत्तरीयकः[२३६] ॥ ३७ ॥
रक्तो[२३७] रक्ताम्बरधरो[२३८] रक्तमाल्यविभूषणः[२३९] ॥
रक्तेक्षणो[२४०] रक्तकरो[२४१] रक्ततालोष्ठपल्लवः[२४२] ॥ ३८ ॥
श्वेतः[२४३] श्वेताम्बरधरः[२४४] श्वेतमाल्यविभूषणः[२४५] ।
श्वेतातपत्ररुचिरः[२४६] श्वेतचामरवीजितः[२४७] ॥ ३९ ॥
सर्वावयवसम्पूर्णसर्वलक्षणलक्षितः[२४८] ।
सर्वाभरणशोभाढ्यः[२४९] सर्वशोभासमन्वितः[२५०] ॥ ४० ॥
सर्वमङ्गलमाङ्गल्यः[२५१] सर्वकारणकारणम्[२५२] ॥
सर्वदैककरः[२५३] शार्ङ्गी[२५४] बीजापूरी[२५५] गदाधरः[२५६] ॥ ४१ ॥
इक्षुचापधरः[२५७] शूली[२५८] चक्रपाणिः[२५९] सरोजभृत्[२६०] ॥
पाशी[२६१] धृतोत्पलः[२६२] शालीमञ्जरीभृत्[२६३] स्वदन्तभृत्[२६४] ॥ ४२ ॥
कल्पवल्लीधरो[२६५] विश्वाभयदैककरो[२६६] वशी[२६७] ॥
अक्षमालाधरो[२६८] ज्ञानमुद्रावान्[२६९] मुद्गरायुधः[२७०] ॥ ४३ ॥
पूर्णपात्री[२७१] कम्बुधरो[२७२] विधृतालिसमुद्गकः[२७३] ॥
मातुलिङ्गधरश्चूतकलिकाभृत्[२७४] कुठारवान्[२७५] ॥ ४४ ॥
पुष्करस्थस्वर्णघटीपूर्णरत्नाभिवर्षकः[२७६] ॥
भारतीसुन्दरीनाथो[२७७] विनायकरतिप्रियः[२७८] ॥ ४५ ॥
महालक्ष्मीप्रियतमः[२७९] सिद्धिलक्ष्मीमनोरमः[२८०] ॥
रमारमेशपूर्वाङ्गो[२८१] दक्षिणोमामहेश्वरः[२८२] ॥ ४६ ॥
महीवराहवामाङ्गो[२८३] रतिकन्दर्पपश्चिमः[२८४] ॥
आमोदमोदजननः[२८५] सप्रमोदप्रमोदनः[२८६] ॥ ४७ ॥
समेधितसमृद्धिश्रीर्ऋद्धिसिद्धिप्रवर्तकः[२८७] ॥
दत्तसौमुख्यसुमुखः[२८८] कान्तिकन्दलिताश्रयः[२८९] ॥ ४८ ॥
मदनावत्याश्रिताङ्गिः[२९०] कृत्तदौर्मुख्यदुर्मुखः[२९१] ॥
विघ्नसम्पल्लवोपघ्नः[२९२] सेवोन्निद्रमदद्रवः[२९३] ४९ ॥

विघ्नकृन्निघ्नचरणो द्राविणीशक्तिसत्कृतः ॥
तीव्राप्रसन्ननयनो ज्वालिनीपालितैकदृक् ॥ ५० ॥
मोहिनीमोहनो भोगदायिनीकान्तिमण्डितः ॥
कामिनीकान्तवक्त्रश्रीरधिष्ठितवसुन्धरः ॥ ५१ ॥
वसुन्धरामदोन्नद्धमहाशङ्खनिधिप्रभुः ॥
नमद्वसुमतीमौलिमहापद्मनिधिप्रभुः ॥ ५२ ॥
सर्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः ॥
ईशानमूर्धा देवेन्द्रशिखी पवननन्दनः ॥ ५३ ॥
अग्रप्रत्यग्रनयनो दिव्यास्त्राणां प्रयोगवित् ॥
ऐरावतादिसर्वाशावारणावरणप्रियः ॥ ५४ ॥
वज्राद्यस्त्रपरीवारो गणचण्डसमाश्रयः ॥
जयाजयपरीवारो विजयाविजयावहः ॥ ५५ ॥
अजितार्चितपादाब्जो नित्यानित्यावतंसितः ॥
विलासिनीकृतोल्लासः शौण्डीसौन्दर्यमण्डितः ॥ ५६ ॥
अनन्तानन्तसुखदः सुमङ्गलसुमङ्गलः ॥
इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिनिषेवितः ॥ ५७ ॥
सुभगासंश्रितपदो ललितालितालिताश्रयः ॥
कामिनीकामनः काममालिनीकेलिलालितः ॥ ५८ ॥
सरस्वत्याश्रयो गौरीनन्दनः श्रीनिकेतनः ॥
गुरुगुप्तपदो वाचासिद्धो वागीश्वरीपतिः ॥ ५९ ॥
नलिनीकामुको वामारामो ज्येष्ठामनोरमः ॥
रौद्रीमुद्रितपादाब्जो हुम्बीजस्तुङ्गशक्तिकः ॥ ६० ॥
विश्वादिजननत्राणः स्वाहाशक्तिः सकीलकः ॥
अमृताब्धिकृतावासो मदघूर्णितलोचनः ॥ ६१ ॥
उच्छिष्टगण उच्छिष्टगणेशो गणनायकः ॥
सार्वकालिकसंसिद्धिर्नित्यशैवो दिगम्बरः ॥ ६२ ॥

अनपायोऽनन्तदृष्टिरप्रमेयोऽजरामरः ॥
अनाविलोऽप्रतिरथोऽह्यच्युतोमृतमक्षरं ॥ ६३ ॥
अप्रतर्क्योऽक्षयोऽजय्योनाधारोऽनामयोऽमलः ॥
अमोघसिद्धिरद्वैतमघोरोऽप्रमिताननः ॥ ६४ ॥
अनाकारोऽब्धिभूम्यग्निबलघ्नोऽव्यक्तलक्षणः ॥
आधारपीठआधारं आधाराधेयवर्जितः ॥ ६५ ॥
आखुकेतनआशापूरक आखुमहारथः ॥
इक्षुसागरमध्यस्थ इक्षुभक्षणलालसः ॥ ६६ ॥
इक्षुचापातिरेकश्रीरिक्षुचापनिषेवितः ॥
इन्द्रगोपसमानश्रीरिन्द्रनीलसमद्युतिः ॥ ६७ ॥
इन्दीवरदलश्यामः इन्दुमण्डलनिर्मलः ॥
इध्मप्रिय इडाभागे इराधामेन्दिराप्रियः ॥ ६८ ॥
इक्ष्वाकुविघ्नविध्वंसी इति कर्तव्यतेप्सितः ॥
ईशानमौलिरीशान ईशानसुत ईतिहा ॥ ६९ ॥
ईषणात्रयकल्पान्त ईहामात्रविवर्जितः ॥
उपेन्द्रउडुभृन्मौलिरुण्डेरकबलिप्रियः ॥ ७० ॥
उन्नतानन उत्तुङ्ग उदारत्रिदशाग्रणीः ॥
ऊर्जस्वानूष्मलमदः ऊहापोहदुरासदः ॥ ७१ ॥
ऋग्यजुःसामसम्भूतिर्ऋद्धिसिद्धिप्रदायकः ॥
ऋजुचित्तैकसुलभ ऋणत्रयविमोचकः ॥ ७२ ॥
लुप्तविघ्नः स्वभक्तानां लुप्तशक्तिःसुरद्विषाम् ॥
लुप्तश्रीर्विमुखार्चानां लूताविस्फोटनाशनः ॥ ७३ ॥
एकारपीठमध्यस्थ एकपादकृतासनः ॥
एजिताखिलदैत्यश्रीरेधिताखिलसंश्रयः ॥ ७४ ॥
ऐश्वर्यनिधिरैश्वर्यमैहिकामुष्मिकप्रदः ॥
ऐरम्मदसमोन्मेष ऐरावतनिभाननः ॥ ७५ ॥

ओङ्कारवाच्य ओङ्कार ओजस्वीनोषधीपतिः ॥
औदार्यनिधिरौद्धत्यधुर्य औन्नत्यनिःस्वनः ॥ ७६ ॥
अङ्कुशःसुरनागानामङ्कुशःसुरविद्विषाम् ॥
अःसमस्तविसर्गान्तपदेषुपरिकीर्तितः ॥ ७७ ॥
कमण्डलुधरः कल्पः कपर्दी कलभाननः ॥
कर्मसाक्षी कर्मकर्ता कर्माकर्मफलप्रदः ॥ ७८ ॥
कदम्बगोलकाकारः कूष्माण्डगणनायकः ॥
कारुण्यदेहः कपिलः कथकः कटिसूत्रभृत् ॥ ७९ ॥
खर्वः खड्गप्रियः खड्गखान्तान्तस्थः खनिर्मलः ॥
खल्वाटशृङ्गनिलयः खट्वाङ्गी खदुरासदः ॥ ८० ॥
गुणाढ्यो गहनो गस्थो गद्यपद्यसुधार्णवः ॥
गद्यगानप्रियो गर्जो गीतगीर्वाणपूर्वजः ॥ ८१ ॥
गुह्याचाररतो गुह्यो गुह्यागमनिरूपितः ॥
गुहाशयो गुहाब्धिस्थो गुरुगम्यो गुरोर्गुरुः ॥ ८२ ॥
घण्टाघर्घरिकामाली घटकुम्भो घटोदरः ॥
चण्डश्चण्डेश्वरसुहृच्चण्डीशश्चण्डविक्रमः ॥ ८३ ॥
चराचरपतिश्चिन्तामणिचर्वणलालसः ॥
छन्दश्छन्दोवपुश्छन्दोदुर्लक्ष्यश्छन्नविग्रहः ॥ ८४ ॥
जगद्योनिर्जगत्साक्षी जगदीशो जगन्मयः
जपो जपपरो जप्यो जिह्वासिंहासनप्रभुः ॥ ८५ ॥
झलझ्झलोल्लसद्दानझङ्कारिभ्रमराकुलः ॥
टङ्कारस्फारसंरावष्टङ्कारिमणिनूपुरः ॥ ८६ ॥
ठद्वयीपल्लवान्तस्थसर्वमन्त्रैकसिद्धिदः ॥
डिण्डिमुण्डो डाकिनीशो डामरो डिण्डिमप्रियः ॥ ८७ ॥
ढक्कानिनादेमुदितो ढौको ढुण्ढिविनायकः ॥
तत्त्वानां परमं तत्त्वं तत्त्वं पदनिरूपितः ॥ ८८ ॥

तारकान्तरसंस्थानस्तारकस्तारकान्तकः ॥
स्थाणुः स्थाणुप्रियः स्थाता स्थावरं जङ्गमंजगत् ॥ ८९ ॥
दक्षयज्ञप्रमथनो दाता दानवमोहनः ॥
दर्पावान्दिव्यविभवो दण्डभृद्दण्डनायकः ॥ ९० ॥
दन्तप्रभिन्नाभ्रमालो दैत्यवारणदारणः ॥
दंष्ट्रालग्नद्विपघटो देवार्थनृगजाकृतिः ॥ ९१ ॥
धनधान्यपतिर्धन्योधनदो धरणीधरः ॥
ध्यानैकप्रकटो ध्येयो ध्यानं ध्यानपरायणः ॥ ९२ ॥
नन्द्यो नन्दिप्रियो नादो नादमध्यप्रतिष्ठितः ॥
निष्कलो निर्मलो नित्यो नित्यानित्यो निरामयः॥९३॥
परंव्योम परंधाम परमात्मा परंपदम् ॥
परात्परः पशुपतिः पशुपाशविमोचकः ॥ ९४ ॥
पूर्णानन्दः परानन्दः पुराणपुरुषोत्तमः ॥
पद्मप्रसन्ननयनः प्रणताज्ञानमोचनः ॥ ९५ ॥
प्रमाणप्रत्ययातीतः प्रणतार्तिनिवारणः ॥
फलहस्तः फणिपतिः फेत्कारः फणितप्रियः ॥ ९६ ॥
बाणार्चिताङ्घ्रियुगलो बालकेलिकुतूहली ॥
ब्रह्मा ब्रह्मार्चितपदो ब्रह्मचारी बृहस्पतिः ॥ ९७ ॥
बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः ॥
बृहन्नादाग्र्यचीत्कारो ब्रह्माण्डावलिमेखलः ॥ ९८ ॥
भ्रूक्षेपदत्तलक्ष्मीको भर्गो भद्रो भयापहः ॥
भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः ॥ ९९ ॥
भव्यो भूतालयो भोगदाता भ्रमध्यगोचरः ॥
मन्त्रो मन्त्रपतिर्मन्त्री मदमत्तमनोरमः ॥ १०० ॥
मेखलावान्मन्दगतिर्मतिमत्कमलेक्षणः ॥
महाबलो महावीर्यो महाप्राणो महामनाः ॥ १०१ ॥

यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः ॥
यशस्करो योगगम्यो याज्ञिको याजकप्रियः ॥ १०२ ॥
रसो रसप्रियो रस्यो रञ्जको रावणार्चितः ॥
रक्षोरक्षाकरो रत्नगर्भो राज्यसुखप्रदः ॥ १०३ ॥
लक्षं लक्ष्यप्रदोलक्ष्यो लयस्थो लड्डुकप्रियः ॥
लानप्रियो लास्यपरो लाभकृल्लोकविश्रुतः ॥ १०४ ॥
वरेण्यो वह्निवदनो वन्द्यो वेदान्तगोचरः ॥
विकर्ता विश्वतश्चक्षुर्विधाता विश्वतोमुखः ॥ १०५ ॥
वामदेवो विश्वनेता वज्रिवज्रनिवारणः ॥
विश्वबन्धनविष्कम्भाधारो विश्वेश्वरप्रभुः ॥ १०६ ॥
शब्दब्रह्म शमप्राप्यः शम्भुशक्तिगणेश्वरः ॥
शास्ता शिखाग्रनिलयः शरण्यः शिखरीश्वरः ॥ १०७ ॥
षड्ऋतुकुसुमस्रग्वी षडाधारः षडक्षरः ॥
संसारवैद्यः सर्वज्ञः सर्वभेषजभेषजम् ॥ १०८ ॥
सृष्टिस्थितिलयक्रीडः सुरकुञ्जरभेदनः ॥
सिन्दूरितमहाकुम्भः सदसद्व्यक्तिदायकः ॥ १०९ ॥
साक्षी समुद्रमथनः स्वसंवेद्यः स्ववक्षिणः ॥
स्वतन्त्रः सत्यसङ्कल्पः सामगानरतः सुखी ॥ ११० ॥
हंसो हस्तिपिशाचीशो हवनं हव्यकव्यभुक् ॥
हव्यो हुतप्रियोहर्षो हृल्लेखामन्त्रमध्यगः ॥ १११ ॥
क्षेत्राधिपः क्षमाभर्ता क्षमापरपरायणं ॥
क्षिप्रक्षेमकरः क्षेमानन्दः क्षोणीसुरद्रुमः ॥ ११२ ॥
धर्मप्रदोऽर्थदः कामदाता सौभाग्यवर्धनः ॥
विद्याप्रदो विभवदो भुक्तिमुक्तिफलप्रदः ॥ ११३ ॥
आभिरूप्यकरो वीरश्रीप्रदो विजयप्रदः ॥
सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ॥ ११४ ॥

मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः ॥
प्रतिवादिमुखस्तम्भो रुष्टचित्तप्रसादनः ॥ ११५ ॥
पराभिचारशमनो दुःखभञ्जनकारकः ॥
लवस्त्रुटिः कला काष्ठा निमेषस्तत्परः क्षणः ॥ ११६ ॥
घटी मुहूर्त प्रहरो दिवा नक्तमहर्निशम् ॥
पक्षो मासोऽयनं वर्ष युगं कल्पो महालयः ॥ ११७ ॥
राशिस्तारा तिथिर्योगो वारः करणमंशकम् ॥
लग्नं होरा कालचक्रं मेरुः सप्तर्षयो ध्रुवः ॥ ११८ ॥
राहुमन्दः कविर्जीवो बुधो भौमः शशी रविः ॥
कालः सृष्टिः स्थितिर्विश्वं स्थावरं जङ्गमंचयत् ॥ ११९ ॥
भूरापोऽग्निमरुद्व्योमाहंकृतिःप्रकृतिः पुमान् ॥
ब्रह्माविष्णुः शिवो रुद्र ईशः शक्तिः सदाशिवः ॥ १२० ॥
त्रिदशाः पितरः सिद्धा यक्षा रक्षांसि किन्नराः ॥
साध्या विद्याधरा भूता मनुष्याः पशवः खगाः ॥ १२१ ॥
समुद्राः सरितः शैला भूतं भव्यं भवोद्भवः ॥
साङ्ख्यं पातञ्जलं योगः पुराणानि श्रुतिः स्मृतिः ॥ १२२ ॥
वेदाङ्गानि सदाचारो मीमांसा न्यायविस्तरः ॥
आयुर्वेदो धनुर्वेदो गान्धर्वं काव्यनाटकम् ॥ १२३ ॥
वैखानसं भागवतं सात्वतं पाञ्चरात्रकम् ॥
शैवं पाशुपतं कालामुखं भैरवशासनम् ॥ १२४ ॥
शाक्तं वनायंक सौरं जैनमार्हतसंहिता ॥
सदसद्व्यक्तमव्यक्तं सचेतनमचेतनम् ॥ १२५ ॥
बन्धो मोक्षः सुखं भोगो योगः सत्यमणुर्महान् ॥
स्वस्ति हुंफट् स्वधा स्वाहा श्रौषड्वौषट्वषण्णमः ॥ १२६ ॥
ज्ञानं विज्ञानमानन्दो बोधः संविच्छमो यमः ॥
एकं एकाक्षराधार एकाक्षरपरायणः ॥ १२७ ॥

एकाग्रधीरेकवीर एकाऽनेकस्वरूपधृक् ॥
द्विरूपो द्विभुजो द्व्यक्षो द्विरदो द्विपरक्षकः ॥ १२८ ॥
द्वैमातुरो द्विवदनो द्वन्द्वातीतो द्वयातिगः ॥
त्रिधामा त्रिकरस्त्रेतात्रिवर्गफलदायकः ॥ १२९ ॥
त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः ॥
चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्मुखः ॥ १३० ॥
चतुर्विधोपायमयश्चतुर्वर्णाश्रमाश्रयः ॥
चतुर्विधवचोवृत्तिपरिवृत्तिप्रवर्तकः ॥ १३१ ॥
चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसम्भवः ॥
पञ्चाक्षरात्मा पञ्चात्मा पञ्चास्यः पञ्चकृत्यकृत् ॥ १३२ ॥
पञ्चाधारः पञ्चवर्णः पञ्चाक्षरपरायणः ॥
पञ्चतालः पञ्चकरः पञ्चप्रणवभावितः ॥ १३३ ॥
पञ्चब्रह्ममयस्फूर्तिः पञ्चावरणवारितः ॥
पञ्चभक्ष्यप्रियः पञ्चबाणः पञ्चशिवात्मकः ॥ १३४ ॥
षट्कोणपीठः षट्चक्रधामा षड्ग्रन्थिभेदकः ॥
षडध्वध्वान्तविध्वंसी षडङ्गुलमहाह्रदः ॥ १३५ ॥
षण्मुखः षण्मुखभ्राता षट्शक्तिपरिवारितः ॥
षड्वैरिवर्गविध्वंसी षड्भिर्भयभञ्जनः ॥ १३६ ॥
षट्कर्कदूरः षट्कर्मनिरतः षड्रसाश्रयः ॥
सप्तपातालचरणः सप्तद्वीपोरुमण्डलः ॥ १३७ ॥
सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः ॥
सप्ताङ्गराज्यसुखदः सप्तर्षिगणमण्डितः ॥ १३८ ॥
सप्तच्छन्दोनिधिः सप्तहोता सप्तस्वराश्रयः ॥
सप्ताब्धिकेलिकासारः सप्तमातृनिषेवितः ॥ १३९ ॥
सप्तच्छन्दो मोदमदः सप्तच्छन्दोमखप्रभुः ॥
अष्टमूर्तिध्येयमूर्तिरष्टप्रकृतिकारणम् ॥ १४० ॥

अष्टाङ्गयोगफलभूरष्टपत्राम्बुजासनः ॥
अष्टशक्तिसमृद्धश्रीरष्टैश्वर्यप्रदायकः ॥ १४१ ॥
अष्टपीठोपपीठश्रीरष्टमातृसमावृतः ॥
अष्टभैरवसेव्योऽष्टवसुवन्द्योऽष्टमूर्तिभृत् ॥ १४२ ॥
अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविःप्रियः ॥
नवनागासनाध्यासी नवनिध्यनुशासिता ॥ १४३ ॥
नवद्वारपुराधारो नवाधारनिकेतनः ॥
नवनारायणस्तुत्यो नवदुर्गानिषेवितः ॥ १४४ ॥
नवनाथमहानाथो नवनागविभूषणः ॥
नवरत्नविचित्राङ्गो नवशक्तिशिरोद्धृतः ॥ १४५ ॥
दशात्मको दशभुजो दशदिक्पतिवन्दितः ॥
दशाध्यायो दशप्राणो दशेन्द्रियनियामकः ॥ १४६ ॥
दशाक्षरमहामन्त्रो दशाशाव्यापिविग्रहः ॥
एकादशादिभीरुद्रैःस्तुतएकादशाक्षरः ॥ १४७ ॥
द्वादशोद्दण्डदोर्दण्डो द्वादशान्तनिकेतनः ॥
त्रयोदशभिदाभिन्नविश्वेदेवाधिदैवतम् ॥ १४८ ॥
चतुर्दशेन्द्रवरदश्चतुर्दशमनुप्रभुः ॥
चतुर्दशादिविद्याढ्यश्चतुर्दशजगत्प्रभुः ॥ १४९ ॥
सामपञ्चदशः पञ्चदशीशीतांशुनिर्मलः ॥
षोडशाधारनिलयः षोडशस्वरमातृकः ॥ १५० ॥
षोडशान्तपदावासः षोडशेन्दुकलात्मकः ॥
कलासप्तदशी सप्तदशः सप्तदशाक्षरः ॥ १५१ ॥
अष्टादशद्वीपपतिरष्टादशपुराणकृत् ॥
अष्टादशौषधीसृष्टिरष्टादशविधिः स्मृतः ॥ १५२ ॥
अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः ॥
एकविंशः पुमानेकविंशत्यङ्गुलिपल्लवः ॥ १५३ ॥

चतुर्विंशतितत्त्वात्मा पञ्चविंशाख्यपूरुषः ॥
सप्तविंशतितारेशः सप्तविंशतियोगकृत् ॥ १५४ ॥
द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः
षट्त्रिंशत्तत्त्वसंभूतिरष्टात्रिंशत्कलातनुः ॥ १५५ ॥
नमदेकोनपञ्चाशन्मरुद्वर्गनिरर्गलः ॥
पञ्चाशदक्षरश्रेणी पञ्चाशद्रुद्रविग्रहः ॥ १५६ ॥
पञ्चाशद्विष्णुशक्तीशः पञ्चाशन्मातृकालयः ॥
द्विपञ्चाशद्वपुःश्रेणी त्रिषष्टयक्षरसंश्रयः ॥ १५७ ॥
चतुःषष्ट्यर्णनिर्णेता चतुःषष्टिकलानिधिः ॥
चतुःषष्टिमहासिद्धयोगिनीवृन्दवन्दितः ॥ १५८ ॥
अष्टषष्टिमहातीर्थक्षेत्रभैरवभावनः ॥
चतुर्नवतिमन्त्रात्मा षण्णवत्यधिकप्रभुः ॥ १५९ ॥
शतानन्दः शतधृतिः शतपत्रायतेक्षणः ॥
शतानीकः शतमखः शतधारावरायुधः ॥ १६० ॥
सहस्रपत्रनिलयः सहस्रफणभूषणः ॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ १६१ ॥
सहस्रनामसंस्तुत्यः सहस्राक्षबलापहः ॥
दशसाहस्रफणभृत्फणिराजकृतासनः ॥ १६२ ॥
अष्टाशीतिसहस्राद्यमहर्षिस्तोत्रयन्त्रितः ॥
लक्षाधीशप्रियाधारो लक्षाधारमनोमयः ॥ १६३ ॥
चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशितः ॥
चतुरशीतिलक्षाणां जीवानांदेहसंस्थितः ॥ १६४ ॥
कोटिसूर्यप्रतीकाशः कोटिचन्द्रांशुनिर्मलः ॥
शिवाभवाध्युष्टकोटिविनायकधुरन्धरः ॥ १६१ ॥
सप्तकोटिमहामन्त्रमन्त्रितावयवद्युतिः ॥
त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ॥ १६६ ॥

अनन्तनामानन्तश्रीरनन्ताऽनन्तसौख्यदः ॥ १६७ ॥
इति वैनायकं नाम्नां सहस्रमिदमीरितम् ॥
इदं ब्राह्मे मुहूर्ते यः पठति प्रत्यहं नरः ॥ १ ॥
करस्थं तस्य सकलमैहिकामुष्मिकं सुखम् ॥
आयुरारोग्यमैश्वर्यं धैर्यं शौर्यं बलं यशः ॥ २ ॥
मेधा प्रज्ञा धृतिः कान्तिः सौभाग्यमतिरूपता ॥
सत्यं दया क्षमा शान्तिर्दाक्षिण्यं धर्मशीलता ॥ ३ ॥
जगत्संयमनं विश्वसंवादो वादपाटवम् ॥
सभा पाण्डित्यमौदाय गाम्भीर्यं ब्रह्मवर्चसम् ॥ ४ ॥
औन्नत्यं च कुलं शीलं प्रतापो वीर्यमार्यता ॥
ज्ञानं विज्ञानमास्तिक्यं स्थैर्यं विश्वातिशायिता ॥ ५ ॥
धनधान्याभिवृद्धिश्च सकृदस्य जपाद्भवेत् ॥
वश्यं चतुर्विधं नृणां जपादस्य प्रजायते ॥ ६ ॥
राज्ञो राजकलत्रस्य राजपुत्रस्य मन्त्रिणः ॥
जप्यते यस्य वश्यार्थं सदासस्तस्य जायते ॥ ७ ॥
धर्मार्थकाममोक्षाणामनायासेन साधनम् ॥
शाकिनीडाकिनीरक्षोयक्षोरगभयापहम् ॥ ८ ॥
साम्राज्यसुखदं चैव समस्तरिपुमर्दनम् ॥
समस्तकलहध्वंसिदग्धबीजप्ररोहणम् ॥ ९ ॥
दुःस्वप्ननाशनं क्रुद्धस्वामिचित्तप्रसादनम् ॥
षट्कर्माष्टमहासिद्धित्रिकालज्ञानसाधनम् ॥ १० ॥
परकृत्याप्रशमनं परचक्रविमर्दनम् ॥
संग्रामरङ्गे सर्वेषामिदमेकं जयावहम् ॥ ११ ॥
सर्ववन्ध्यात्वदोषघ्नं गर्भरक्षैककारणम् ॥
पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतेरिदम् ॥ १२ ॥

देशे तत्र न दुर्भिक्षमीतयो दुरितानि च ॥
न तद्गृहं जहाति श्रीर्यत्रायं पठ्यते स्तवः ॥ १३ ॥
क्षयकुष्ठप्रमेहार्शभगन्दरविषूचिकाः ॥
गुल्मप्लीहानमश्मानमतिसारं महोदरम् ॥ १४ ॥
कासं श्वासं गुदावर्तं शूलं शोथादिसम्भवम् ॥
शिरोरोगं वमिं हिक्कां गण्डमालामरोचकम् ॥ १५ ॥
वातापित्तकफद्वन्द्वत्रिदोषजनितज्वरम् ॥
आगन्तुविषमं शीतमुष्णं चैकाहिकादिकम् ॥ १६ ॥
इत्याद्युक्तमनुक्तं वा रोगं दोषादिसम्भवम् ॥
सर्वं प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जपः ॥ १७ ॥
सकृत्पाठेनसंसिद्धः स्त्रीशूद्रपतितैरपि ॥
सहस्रनाममन्त्रोऽयं जपितव्यः शुभाप्तये ॥ १८ ॥
महागणपतेः स्तोत्रं सकामः प्रजपन्निदं ॥
इच्छया सकलान्भोगाननुभूयेह पार्थिवान् ॥ १९ ॥
मनोरथफलैर्दिव्यैर्व्योमयानैर्मनोरमैः ॥
चन्देन्द्रभास्करोपेन्द्रब्रह्मशर्वादिसद्मसु ॥ २० ॥
कामरूपः कामगतिः कामतो विचरन्निह ॥
भुक्त्वा यथेप्सितान्भोगानभीष्टान्सह बन्धुभिः ॥ २१ ॥
गणेशानुचरो भूत्वा महागणपतेः प्रियः ॥
नन्दीश्वरादिसानन्दीनन्दितः सकलैर्गणैः ॥ २२ ॥
शिवाभ्यां कृपया पुत्र निर्विशेषं च लालितः ॥
शिवभक्तः पूर्णकामो गणेश्वरवरात्पुनः ॥ २३ ॥
जातिस्मरो धर्मपरः सार्वभौमोऽभिजायते ॥
निष्कामस्तु जपन्नित्यं भक्त्या विघ्नेशतत्परः ॥ २४ ॥
योगसिद्धिं परां प्राप्य ज्ञानवैराग्यसंस्थितः ॥
निरन्तरोदितानन्दे परमानन्दसंविदि ॥ २५ ॥

विश्वोत्तीर्णे परेपारे पुनरावृत्तिवर्जिते ॥
लीनो वैनायके धाम्नि रमते नित्यनिर्वृतः ॥ २६ ॥
यो नामभिर्हुनेदेतैरर्चयेत्पूजयेन्नरः ॥
राजानो वश्यतां यान्ति रिपवो यान्ति दासताम् ॥ २७ ॥
मन्त्राः सिध्यन्ति सर्वेपि सुलभास्तस्य सिद्धयः ॥
मूलमन्त्रादपिस्तोत्रमिदं प्रियतरं मम ॥ २८ ॥
नभस्ये मासि शुक्लायां चतुर्थ्यां मम जन्मनि ॥
दूर्वाभिर्नामभिः पूजां तर्पणं विधिवच्चरेत् ॥ २९ ॥
अष्टद्रव्यैर्विशेषेण जुहुयाद्भक्तिसंयुतः ॥
तस्येप्सितानि सर्वाणि सिध्यन्त्यत्र न संशयः ॥ ३० ॥
इदं प्रजप्तं पठितं पाठितं श्रावितं श्रुतम् ॥ ३१ ॥
व्याकृतं चर्चितं ध्यातं विमृष्टमभिनन्दितम् ॥
इहामुत्र च सर्वेषां विश्वैश्वर्यप्रदायकम् ॥ ३२ ॥
स्वच्छन्दचारिणाप्येष येनायन्धार्यते स्तवः ॥
स रक्ष्यते शिवोद्भूतैगणैरध्युष्टकोटिभिः ॥ ३३ ॥
पुस्तके लिखितं यत्र गृहे स्तोत्रं प्रपूजयेत् ॥
तत्र सर्वोत्तमा लक्ष्मीः सन्निधत्ते निरन्तरम् ॥ ३४ ॥
दानैरशेषैरखिलैर्व्रतैश्च तीर्थैरशेषैरखिलैर्मखैश्च
न तत्फलं विन्दति यद्गणेशसहस्रनाम्नां स्मरणेन सद्यः ॥ ३५ ॥
एतं नाम्नां सहस्रं पठति दिनमणौ प्रत्यहं प्रोज्झिहाने
सायं मध्यंदिने वा त्रिषवणमथवा सन्ततं वा जनो यः
स स्यादैश्वर्यधुर्यः प्रभवति च सतां कीर्तिमुच्चैस्तनोति
प्रत्यूहं हन्ति विश्वं वशयति सुचिरं वर्धते पुत्रपौत्रैः ॥ ३६ ॥
आकिञ्चनोऽपि मत्प्राप्तिचिन्तको नियताशनः ।
जपेत्तचतुरो मासान् गणेशार्चनतत्परः ॥ ३७ ॥

दरिद्रतां समुन्मूल्य सप्तजन्मानुगामपि ।
लभते महतीं लक्ष्मीमित्याज्ञा पारमेश्वरी ॥ ३८ ॥

